- Title – — अज्ञात
- Accession No – Title –
- Accession No –
- Folio No/ Pages – २५ पेज क्रमानुसार / ५8 पृष्ठ
- Lines- अन्य कुछ रिक्त पृष्ठ भी हैं
- Size 13वाँ क्रम पुनः आगे जोड़ा गया है।
- Substance Paper –
- Script Devanagari – देवनागरी
- Language – संस्कृत
- Period –
- Beginning – मनोबुद्धिरहङ्कारश्चिन्तं करणमान्तरम् - संशयो निश्चयो गर्वः स्मरणं विषयाइमे इति –
- End – भैरवभैरालमारिकायक्षराक्षसाः —
- Colophon-
- Illustrations -
- Source -
- Subject - —
- Revisor -
- Author - बृहद् अभिधाने तारानाथतर्कवाचस्पति
1. Remarks- भट्टाचार्यकृते,

ज्योतिष्प्रकाश: खण्डनखण्डखाद्यः [illegible] प्रथमपृष्ठे लिखितं — विद्यते ।

तर्क

बृहदभिधाने तारानाथवाचस्पति
भट्टाचार्यकृते-

मनोबुद्धिरहङ्कारश्चित्तं करणमान्तरम्-
संशयो निश्चयो गर्वः स्मरणं विषया इमे
इति-
ज्ञानसुखादिप्रत्यक्षं स्वग्राहकेन्द्रियसाध्
यम् प्रत्यक्षत्वात् रूपादिप्रत्यक्षवत्
नच चक्षुरादीनां तत्करणत्वम् रूपादित्वा मx
भावात् इत्यन्तःकरणसिद्धिरिति नैया
यिकाः सांख्यास्तु महत्तत्त्वमेवान्तःक
रणमङ्गीचक्रुः-
नाभोर्ध्वं तच्च यद्वस्तु माच्छादयति ज्ञानिनी
अन्तरीयं प्रशस्तं तदच्छिन्नमुभयान्तयो
रिति-
खण्डनखण्डखाद्ये- अनाभावितसत्त्वं चे
त्कारणं तदसत्त्वतः नान्ताभावितसत्त्वं चे
त्कारणं तदसत्त्वतः इति अस्यायमाश
यः अव्यवहितपूर्ववर्तितया कारणस्य
यत्सत्त्वमुररीक्रियते तस्य सत्त्वमस्ति न
वा तस्य सत्त्वस्वीकारे पुनस्तत्सत्त्वस्य सत्त्व
स्वीकारेऽनवस्थापातः तत्र उत्तरत्रैक
स्य सत्त्वमनङ्गीकृत्यैवानवस्थावारणीया
तथाच कारणसत्त्वेपि कुतस्त्यानांगीक्रि

यते एवञ्च विनापि सत्वं तदङ्गीकृत्य का
रणतास्वीकारेण कोपि दोषोऽस्तीति-
अपटी- कनान्त इति व्याख्यानेव स्त्र-
परस्तारज्ञादः न आइद बकार- अ
गर्भः बवंदज्ञादयेश हवयान-
अदृष्टम् उपायउपायरूपे भाग्ये इन्द्रिया
योग्यत्वात्तस्यादृष्टत्वम्- अदृष्टसत्वे प्र
माणंच सापेक्षत्वादनादित्वाद्वैचित्र्याद्
वृत्तितः- प्रत्यात्मनियमाद्भुक्तेरस्तिहे
तुरलौकिकः इति चिरध्वस्तंफलायालं
नकर्मातिशयम्विनेति च कुसुमाञ्जलिः
अस्यायमभिप्रायः इह हि जगति उच्चाव
चविचित्राः सुखदुःखानुभवरूपा भोगाः
प्रत्यात्मवेदनीयाः तेच न नित्याः उत्पत्तिवि
नाशशालित्वात् अतएव न सदातनाः कि
न्तु कादाचित्का एव सतिच तेषां कादाचि
त्कत्वे हेतुसापेक्षत्वमेव तथाहि विमता
भोगव्यक्तयः हेतुसापेक्षाः कादाचित्कत्वा
त् घटवत् यद्यत्कादाचित्कं तत्तद्धेतुसा
पेक्षं यथा घटः भवन्तिच भोगव्यक्तयः
कादाचित्काः तस्माद्धेतुसापेक्षा इति पञ्चा
वयववाक्येन भोगानां हेतुसापेक्षत्वसि
द्धिः सच हेतुर्नलौकिकप्रत्यक्षादिवि

षयः कश्चित्सम्भवति तदन्वयव्यतिरेकाभा
वात् न च कालस्यैव तद्धेतुत्वेनार्थान्तरापा
तः कालस्य साधारणकारणतया विचित्र
भोगं प्रत्यनियामकत्वात् अन्यथा काल
स्यैकरूपतया सर्वदा सर्वभोगप्रसङ्गः एते
न तत्कालत्वेन कारणतावच्छेदकत्वेनापि न
निस्तारः तत्तत्कालव्यक्तीनां पूर्वत्वमात्रसा
धारण्येन प्रत्यात्मविचित्रभोगोपपादक
त्वानुपपत्तेः अतो विचित्रभोगान्यथानुप
पत्त्या तदाधायकमलौकिकं कारणं यत्क
ल्पनीयं तदेवादृष्टम् एवमनुमानेन आ
गमप्रामाण्यानभ्युपगन्तृन् प्रति अलौकि
कादृष्टसाधनम् आगमेन तु तत्सिद्धिरेवम
भियुक्तैरभ्युपेता- स्वर्गकामो यजेतेति वाक्ये
समभिव्याहृतस्वर्गसाधनत्वं यागे विधिप्र
त्ययेन बोध्यते तच्च न सम्भवति स्वर्गादेः का
लान्तरभावितया आशुविनाशिनो यागादे
स्तदानीमसत्त्वेन कारणत्वासम्भवात् अतो
विधिबोधितं यागादेरिष्टसाधनत्वं फलका
लपर्यन्तस्थायि स्वजन्यव्यापारं विनानुपप
न्नं ~~सि~~ अनुपपत्तिज्ञानेन द्वारीभूतमपूर्वं क
ल्प्यते तदभिप्रायेणैव चिरध्वस्तमित्याद्यु
क्तम्- पौरुषं दैवसम्पत्त्या काले भवति पा
र्थिव- त्रयमेतन्मनुष्याणां पिण्डितं स्यात्फ

वृह· लावहम्भितिशास्त्रान्तरे कार्य्यजननसामग्र्यां
२ दैवपदाभिधेयस्यादृष्टस्यकीर्त्तनम् तच्चा
दृष्टंद्विविधम् पुण्यंपापञ्च· विहितनिषिद्धा
नुष्ठानजन्येते- तदुभयमपि त्रिविधम्
प्रारब्धम् फलदानोन्मुखंसंचितञ्चेति देहाद्या
रम्भकमदृष्टंप्रारब्धम् वहूनामदृष्टानांचिर
सञ्चितानांमध्ये फलविपाकायोन्मुखंफल
दानोन्मुखम्- तद्भिन्नंसञ्चितम् तत्र येस
र्थाजगत्यस्मिन्नदृष्टसंहारकारकाः- तेपि
कालेनलीयन्त इतिशास्त्रात् कलनात्सर्व
भूतानांकालइत्यभिधीयतइत्युक्तेश्च काल
स्यसर्वनाशकत्वेपिनादृष्टनाशकत्वम् ना
भुक्तंक्षीयतेकर्म्मेतिशास्त्रान्तरात् किन्तुभो
गादेवक्षयः तथा पुण्यस्य कर्मनाशाजलस्प
र्शादितोपिनाशः- पापस्यप्रायश्चित्तादिना
नाशः- प्रारब्धातिरिक्तपुण्यापुण्यकर्मणां
तत्त्वज्ञानान्नाशः - इदमदृष्टं वेदान्तिभिर्नी
जुमन्यते तैर्हि कर्मणः सूक्ष्मावस्थापन्नसं
स्कारविशेषएवादृष्टस्यां तयाङ्गीक्रियते इ
तिभेदः तच्चादृष्टमात्म(नीय)धर्म इतिनैया
यिकावैशेषिकादयश्चाभ्युपगच्छन्ति- वेदा
न्तिसांख्यपातञ्जलास्तुबुद्धिधर्म इतिभेदः
तेषांमतेहि कर्तृत्वस्यबुद्धिधर्मतया शास्त्र

देशितं फलमनुष्ठातरीतिन्यायात् तत्रैवादृष्टोत्प
त्तेरुचितत्वम् अन्यकृतकर्मणान्यस्यादृष्टो
त्पत्तौ अतिप्रसङ्गात् कृतहानाकृताभ्यागम
प्रसङ्गश्चेति सूत्रेण चतुर्थेव प्रतिपादनात् अधि
कमाकरे- अस्यादृष्टशब्दवाच्यत्वे प्रत्यक्ष
मनिमित्तं विद्यमानोपलम्भनत्वादिति जैमिनि
सूत्रं मानम् अस्यायमभिप्रायः नोदनालक्ष
णोर्थो धर्म इति धर्मे वेदैकसमधिगम्यत्वमुप
क्षिप्तं तस्य दृढीकरणार्थमिदं सूत्रमवतनम्
अनुष्ठानादूर्ध्वमुत्पाद्यमानस्य पूर्वमविद्यमा
नत्वान्न प्रत्यक्षयोग्यतास्ति धर्मस्य नत्तर
काले पि रूपादिराहित्यान्नेन्द्रियैरवगम्यता-
अत एवादृष्टमिति सर्वैरभिधीयत इति ऋग्वे
दभाष्यम् सूत्रार्थस्तु प्रत्यक्षं चक्षुरादि तत्त
द्ग्रहणे निमित्तं तेषां विद्यमानोपलम्भहेतु
त्वात् धर्मस्य प्रागविद्यमानत्वात् लिङ्गं
रादित्यात्केनानुमानविषयत्वमप्यस्ति सुख
दुःखयोर्मनुष्यकत्वेन लिङ्गत्वसम्भवेपि त
योर्लिङ्गत्वज्ञानमपि वेदैकगम्यम् कस्य क
र्मणः किम्फलमिति अध्यवसायस्य वेदैक
समधिगम्यत्वात् सुखदुःखाभ्यां सामान्य

२ नधर्मोधर्ममात्रानुमानेपितद्विरोधप्रतिपत्तौवेद
स्यैवसाधनत्वादिति प्रतिज्ञातंधर्मस्यचोदना
मात्रप्रमापकत्वंसुस्थितमिति—
अपथ्यव्याख्याने- संयोगविरुद्धानि- वल्ली
फलकवककरीराम्लफललवणकुलत्थपिण्या
कदधितैलविरोहिपिष्टशुष्कशाकाजाविक
मांसमद्यजाम्बवचिलिचिममत्स्यगोधावराहां
श्चैकध्यमश्नीयात्पयसा- सुश्रुते- अनो
न्यान्यपिसंयोगादहितानि व्याख्यास्यामः
नचविरूढधान्यैर्वसामधुपयोगुडमाषैर्वा
ग्राम्यानूपौदकपिशितादीनिचाभ्यवहरेत्-
नपयोमधुभ्यांरोहिणीशाकंजातुशाकंवा
श्नीयात्- बलाकांवारुणीकुल्माषाभ्याम्-
काकमाचींपिप्पलीमरिचाभ्याम्- नाडी
मङ्गशाककुक्कुटदधीनिचनैकध्यम्- सौ
वीरकेणसहतिलशष्कुलीम्- मत्स्यैः सहे
क्षुविकारान्- मधुचोष्णोदकानुपानम्-
पित्तेनवामांसानि- सुराकृशरपायसांश्च
नैकध्यम्- गुडेनकाकमाचीम्- मधुनामू
लकम्- गुडेनवाराहंमधुनाच सहविरु
द्धम्- क्षीरेणमूलकम्- आम्रजाम्बवश्वा
विच्छूकरसगोधांश्च सर्वांश्चमत्स्यान्विरो

खेलचिलिचिमं पयसा - कदलीफलं तालफले
न पयसा दध्ना तक्रेण वा - लकुचफलं पयसा
- दध्ना पयसा माषसूपेन वा मधुना घृतेन च
प्राक्पयसः पयसो नेव वा -
अतः कर्मविरुद्धान्वक्ष्यामः कपोतान् सर्षपतै
लभृष्टान्नाद्यात् - कपिञ्जलमयूरलावति
त्तिरिगोधाश्चैरण्डदार्वग्निसिद्धा एरण्डतैलसि
द्धा वा नाद्यात् - कांस्यभाजने दशरात्रपर्युषि
तं सर्पिर्मधुचोष्णेषु लेवा - मत्स्यपरिपचने शृं
गवेरपरिपचने वा सिद्धां काकमाचीम् - तिल
ना. कल्कसिद्धमुपोदिकाशाकम् -
ना - नारिकेलेन वराहवसापरिभृष्टां
बलाकाम् - भासमङ्गारशूल्यं नाश्नीयादिति
- अतो मानविरुद्धान्वक्ष्यामः मध्वम्बुनी म
धुसर्पिषी मानतस्तुल्ये नाश्नीयात् स्नेहे मधु
स्नेहे जलस्नेहे वा विशेषादन्तरिक्षोदका
नुपानो -
अपरोक्षं, अ॰ नपरोक्षम् इंद्रियासन्निकृष्टम्
प्रत्यक्षे विषयेन्द्रियसन्निकर्षोत्पन्ने ज्ञाने स
म्भावनादि निरासेन विचारविपाकात्तेनैव
क्रम[illegible]नजनितं ज्ञानं प्रतिबन्धाभावात्फलं
जनयेदपरोक्षमित्युच्यतामिति वृत्तः फलं ज्ञा
नतामिति भावः प्रतिबुद्धेः प्रतिबिम्बमिति

8

वृ॰
४

सांख्याः बुद्धौ चितः प्रतिबिम्बमिति वेदान्तिनः
संस्कारं विषयतां विशेषयंतेति तार्किकादयः
तथा हि चक्षुरमिन्द्रियेण विषयः सम्बध्यते
ततो विषयालोचनारूपं निर्विकल्पकस्थानी
यं सामान्याकारं ज्ञानं जायते ततो विषयावर
णनाशरूपप्रतिबन्धनाशाच्चित्प्रतिबिम्ब
रूपं फलं जनयज्ज्ञानमपरोक्षमित्युच्यत
इति वेदान्तिनः नैयायिकास्तु विषयेन्द्रिय
सन्निकर्षात्प्रथमं निर्विकल्पकं रूपं विशे
ष्यविशेषणयोः संसर्गानवगाहि ज्ञानं जा
यते तदनन्तरं विषयप्रत्यक्षमित्य वः
आचक्षुः सांख्यादयस्तु विषये
न्द्रियसन्निकर्षे बुद्धेस्तत्तद्विषयाकारेण प
रिणामे जाते तत्तदज्ञाननाशको बुद्धेः प्रतिबि
म्बरूपं फलमुत्पद्यते तत्रैव ज्ञानव्यवहारो
मुख्यः बुद्धिवृत्तौ तु गौण इति मन्यन्ते यु
क्तितोऽपि न बाध्यते दिङ्मोहरदपरीक्षाद्द्वैते
ःसाक्ष्यसत्त्वम् ब्रह्मणस्त्वज्ञानस्यापावरण
भावात्सर्वदा प्रकाशमानत्वान्नेन्द्रियादिस
न्निकर्षापेक्षेति तस्य सर्वदा प्रत्यक्षरूपत्व
म् यस्मात्तदपरोक्षाद्ब्रह्मेति श्रुतिः अप
रोक्षादपरोक्षमित्यर्थः अप्र॰ अप्रत्यये अ
चू त्रि॰ तद्विषये

आपा० पृ० आचा० भाषायाम्

अनतिरिक्तवृत्तित्वमवर्णोदकत्वमिति गदा
धरः-
वाग्गुणाश्चैते मवन्द्रेणदर्शिताः यथा संस्कार
वत्त्वमौदार्य्यमुपचारपरीतता मेघगम्भीर्यनि
र्घोषवृत्तिनादविधायिता १ दक्षिणत्वमुप
नीतरागत्वं च महार्थता - अव्याहतत्वं शिष्टत्वं
संशयानामसम्भवः २ निराकृतान्योत्तरत्वं हृद
यङ्गमतापि च - मिथःसाकाङ्क्षता प्रस्तावौचित्यं
तत्त्वनिष्ठता ३ अप्रकीर्णप्रसृतत्वमस्वश्ला
घान्यनिन्दिता - आभिजात्यमतिस्निग्धमधु
रत्वं प्रशस्यता ४ अमर्मवेधितौदार्य्यं धर्मार्थप्र
तिबद्धता - कारकाद्यविपर्यासो विभ्रमादिवि
मुक्तता ५ चित्रकृत्त्वमद्भुतत्वं तथानतिविल
म्बिता - अनेकजातिवैचित्र्यमारोपितविशे
षता ६ सत्त्वप्रधानता वर्णपदवाक्यविवि
क्तता अव्युच्छित्तिरखेदित्वं पञ्चत्रिंशच्च वा
ग्गुणाः ७

अनुगतस्य तुल्याकारप्रतीतिप्रयोजको धर्म
भेदः यथा घट इति प्रतीतौ घटत्वम् एवं पट
त्वम् तस्य सर्वत्रैकरूपेण प्रतीयमानत्वात्
अननुगतं च तत्तद्व्यक्तित्वादिकं तस्य सर्वत्र
प्रतीत्यभावात्- अनुगमस्य तुल्यप्रती

निवयोजकधर्मानुसरणम्-
अनवगीत. त्रिलिङ्ग- अग्निन्हिते-
सिद्धान्तशिरोमणौ भुजलजलधिमध्ये वाड
वोग्निः स्थितो सान्तलिलभरनिमग्नात् उत्थिता
धूममाला: वियति पवननीता: सर्वतस्ताडव
न्ति धूमणि किरणान तथा विद्युतस्फुलिङ्गा:
१ करका: उद्भूतैः पांशुभिर्भूमेः प्रवरणपव
नोच्चयात् मेघमण्डलमानीतैर्मौलिन्यपरि
वर्जितैः १ मिश्रणाज्जलबिन्दूनां पिण्डभावो
भवेदिह दृश्यन्ति पतन्तो तेऽवनौ घनः
स्थितो २ विद्युत्पातः - अकस्माद्भूतं
तेजः पार्थिवांशकमिश्रितम् वाय्वोर्वेगसं म
घाते प्रतिकूलानुकूलयोः १ वाय्वोस्तत्रति
तिर्यायो त्यकोलप्राच्ये वर्षणे- यतः प्रावृषि
नैवैतेषां सर्वः प्रसरन्तिहि २ तत्रैधा पार्थि
वं चाप्यं तैजसं तत्र दृश्यितः गतो निर्झरदा
हे स्नम् मिश्रैरनुमीयते २
उल्का- यासां गतिर्दिवि भवेद्गणितेन गम्या
स्ताभ्यस्तारका: सकलखेचरतोऽतिदूरे- तिर्यक्ति
या अनियतोऽन्तयस्तु तारा अन्द्रादयो हि निव
सन्ति तदाश्रितास्ता: १ शीतांशुवज्ज्वलनमसा
तपनात्स्फुरन्ति नाश्नावहप्रवहमारुतमध्य
संस्था: दृष्टौ निलैः स्तिमितभानुपागते

सिंलाराः पतन्ति कुसुमिकुन्तलावशेन २
अधरजः संहतिः वर्षान्ते निर्जलामेघा वायु
नाविरलीकृताः - ईषच्छायावशेषास्तु पतन्ति
वसुधातले १ धूमावयवरूपैस्तैर्ध्वस्तायन्ते
गिरयो द्रुमाः रामारामादयस्तेन पुनरङ्कप्र
शोभिताः २ भूवायुनाविशीर्णास्तु विलीयन्ते
नभस्तले - तद्रजः संहतिर्येन महिषीक्षीर
नाशकृत ३
अतसा - स्वयमप्रवृत्तस्यान्यस्य प्रवृत्त्यविघा
तकरत्वेन प्रवर्तनाद्रूपायामनुमतौ -
अनुमतम् - आनते
अनतर्ष - सुरापानपात्रे मद्ये च -
अनुप्रासोत - आदाय वकुलगन्धानन्धीकु
र्वन्पदे पदे भ्रमरान् - अयमेति मन्दमन्दं
कावेरीवारिपावनः पवनः १
हृशादग्धं मनसिजं जीवयन्ति दृशैव याः वि
रूपाक्षस्य जयिनीस्तां स्तुमो वामलोचनाः
१ केशाः काशस्तवकविकाशाः कायः प्र
कटितकरभविलासः - चक्षुर्दग्धवराटक
कल्पं त्यजति न चेतः काममनस्यम् १
शारदा शारदाम्भोजवदना वदनाम्बुजे स
र्वदा सर्वदास्माकं सन्निधिं सन्निधिं क्रियात्

श्रीरामायनमः

वै: १ शुश्रूषाश्रवणंचैवग्रहणंधारणंतथा
६ ऊहापोहोर्थविज्ञानंतत्त्वज्ञानंचधीगुणाः
१ तमन्वेत्यनुबध्नातितच्छीलंतन्नि
षेधति तस्यैवानुकरोतीतिशब्दाः सादृश्य
वाचकाः १
जन्मर्क्षंमैथुनंमंत्रोगृहच्छिद्रंचवञ्चनम्आ
युर्द्रव्यापमानंस्त्रीनप्रकाश्यानिसर्वथा १
यावज्जीवमहंमौनीब्रह्मचारीचमेपितामा
तामममवंध्यासीदपुत्रश्चपितामहः १
हृदयेवससिगिरीन्द्रौत्रिभुवनजयिनीकरे
तेरा- अवलान्वंयदिमन्येकेवलवन्तो
जानीमः १
सममब्राह्मणेदानंद्विगुणंब्राह्मणब्रुवइति
वाक्ये अब्राह्मणः अब्रह्मणब्राह्मणः-
अब्राह्मणास्तुषट्प्रोक्ताऋषिणातत्त्ववा
दिना- आद्योराजभृतस्तेषांद्वितीयःक्रय
विक्रयी १ तृतीयोबहुयाज्यःस्याच्चतुर्थो
ग्रामयाजकः पञ्चमस्तुभृतस्तेषांग्रामस्य
नगरस्यच २ अनागतांतुयःपूर्वांसादित्यां
चैवपश्चिमाम् नोपासीतद्विजःसन्ध्यांसष
ष्ठोब्राह्मणःस्मृतः ३ इतिशातातपः-
संयावः घृतक्षीरगुडगोधूमचूर्णसाधितः-

न म्लेच्छितवै नापभाषितवै म्लेच्छो ह वा एष यदपशब्दः सं
कीर्णानाभिजानेषु नाप्रभुद्धेषु संस्कृतमिति व
चः - अर्वाकस्यन्तरो योगाद्वेन स्याति
ष्ठापनात् - आभिरूप्याच्च बिम्बानां देवः सा
न्निध्यमृच्छति ।
अभोजु - भाषायां - लगाम - अजीर्णे
भोजनं येषां जीर्णे येषामभोजनम् - रात्रौ च
भोजनं येषां ते वै नश्यन्ति धातव इति वैद्यके -
अभ्रक - वा अभ्रख - रोही भाषा -
धान्वन्तरिः क्षपणकोऽमरसिंहशङ्कुवेताल
भट्टघटकर्परकालिदासाः ख्यातो वरा
हमिहिरो नृपतेः सभायां रत्नानि वै वररुचि
र्नव विक्रमस्य ।
क्षितिर्जलं तथा तेजः पवनो मन आत्मा च परापर
त्वमूर्तत्वक्रियावेगाश्रया अमी इति भाषा
धर्माधर्मौ भावना च शब्दो बुद्ध्यादयोऽपि च ए
तेऽमूर्तगुणाः सर्वे - भाषापरिच्छेदे -
धुवमस्तनपनामवाज्यया सावधरमकंम
धुपस्तवाजिहीने - माघे -
अम्बरीष - भाषा - तवा - वा - कड़ाही -
भ्राष्ट्रपात्रं त्वाष्ट्रणाम् लोकः पच्यमानस्तु भि
दुर्मैर्वा त्वाष्ट्रणां भुनक्त्यचैर्यादानेन चेज्ययाद
यंयाचेति अर्चीः अर्चधातु - आधारे अड्

२. प्रतिमार्थके - प्रजायान्तु भावेऽग्रः
अर्द्धजरतीन्यायस्यायमर्थः अर्द्धं कुक्कु
ट्याः पाकायार्द्धं प्रसवायेति यथा कश्चिद
देत् - प्रवाहमवधिं कृत्वा यावद्ब्रह्म चतुष्ट
यम् अत्र नारायणः स्वामी नान्यः स्वामीक
थेचनेति - प्रवाहं गंगायाः इति शेषः -
आद्यर्द्धं भ्रमं नाम श्लोकार्द्धं भ्रमणं यदीति स
रस्वतीकण्ठाभरणे शब्दालङ्कारभेदः य
था माघे

अ	भी	क	म	ति	के	ने	द्धे
भी	ता	न	न्द	स्य	ना	श	ने
क	न	त्क	का	म	से	ना	के
म	न्द	का	म	क	म	स्य	ति ॥

त्व: किराते

स	स	त्त्वे	र	ति	दे	नि	त्वे
स	द	रा	म	र्ष	ना	प्ति	नि
त्व	रा	धि	क	कं	सं	ना	दे
र	म	क	त्व	म	क	र्ष	ति ॥

मारणावकारणो हारश्चतुर्विंशतितलतात्मकः -
अर्द्धहार - चतुःषष्टितलतिकोऽहारभेदे -
अर्द्धौरुकम् - उत्तमस्त्रीणामर्द्धोरुपर्यन्तचो
लकाकारे परिधेयवस्त्रे -
अर्द्धकः - देशः अर्द्ध - वा तद्राजा अर्द्धकः -
शब्दार्थयोरस्थिरत्वे धर्माः शोभातिशायि
नः रसानुपकुर्वन्तो लङ्कारास्तेऽङ्गदादिव

नू १ साहित्यदर्पणे उक्तम् शब्दार्थयोः शो
भाकारित्वं नहन्नहराम्
पादगता विलोमावृत्तिर्यथा - यामताश
कृतायासा - सायाताकृशतामया - रमरा
रकमानेस - सनेनाकरमामर १
अर्द्धगता यथा सारमानवरारोसा - नगेभाग
मनाहिया - याहिनामगभागेन - हारोरव
नमारसा १
श्लोकगा यथा यानमानयमारविकशोना
नजनासना - यामुदारशताधीनामायामा
यमनादिता १
क्रमात्पादचतुष्कस्यपंक्तिशः पारलेखने - तुर
या ङ्पादार्धेनैनश्लोकोन्यउपजायते १ यथा
वा १ ला ३० सु ९ का २० न २ वा २४ ला ११ सा २६
का १६ नि १९ ला २ न २९ क १० ला २७ लि ४ ता २३
स ३१ स्वा ८ सु ७ न २४ व २२ नी ६ सा २५ रा १२
द १८ वि १५ का ३२ त्र ७ न २८ ग १३ द्रि २ ज ५
अत्रतुरङ्गगत्या - वाला ललितनी क्रस्वा सुक
लारागतर्पिका सुदन्तिकावर्द्धितामा वासाला
= तलला सिका इति दत्ता ज्ञानुसारेण क्रमशो
वर्णाग्रदरो श्लोको यं जायते -
अथार्द्धभ्रमं नाम श्लोकार्द्धभ्रमणं यदि - तदि
ष्ट सर्वतो भद्रं सर्वतो भ्रमणं यदीति अर्द्धभ्रमं

९६ः
८

[illegible]

सर्वमङ्गलम् सर्वतोभद्रं यथा

दे वा का निं नि का वा दे नि =
वा हि का स्व स्व का हि वा
का का रे भ भ रे का का
नि स्व भ व्य व्य भ स्व नि ॥

अर्धभ्रमवत्सर्वम् किन्तु पादानामपि
अनुलोमविलोमाभ्यां तथैव सर्वतोभ्रम
णेन सर्वतोभद्रमिदम्
पाण्डवानां सभामध्ये दुर्योधन उपागतः
तस्मै गां च हिरण्यं च सर्वाण्याभरणा
नि च ॥ अत्र क्रियापदं गूढम् - यो-
धन उपागतस्तस्मै गां वादिकमददुरित्यर्थः
अत्र - मानरि - सर्वेषां सर्वभक्तिका
यां परमात्मदेवतायाम् - साचार्य वेदे
अहन्नाहत्नेत्यादिसूक्ते प्रसिद्धा -
अवगुण्ठनम् - योषितां शिरःप्रा
वरणक्रियायाम् - मुखाच्छादनवस्त्रे च -
अवगृह्यम् - पगृह्यसंज्ञकं प्रातिसाख्य-
अवच्छेदः विशेषणोपाधिना विशेषक
रणम् - उपाध्यादिना विशेषिते - अवच्छे
दकतानिरूपिते च -
अवच्छेदकता हि स्वरूपसम्बन्धविशे ८

षः अनतिरिक्तवृत्तित्वम्वा तन्निरूपितम
वच्छिन्नत्वम् यथा दण्डादीनां घटकार
णतावच्छेदकं दण्डत्वादिकम् तस्य तदति
रिक्तदेशेऽवृत्तित्वात् एवं घटादीनामत्य
न्ताभावप्रतियोगितायास्तदतिरिक्तदेशेऽ
वृत्तित्वात् घटत्वादिकमवच्छेदकम् अ
तः प्रतियोगितायां घटाद्यवच्छिन्नत्वम्
- इयत्ताकरणेच यथा द्रोणावच्छिन्नो व्री
हिः सीमाकरणेच यथा गृहावच्छिन्न
आकाशः - अवधारणेच व्याप्तौच अ
व्याप्यवृत्तौच -
अवच्छेदकः अवच्छेदकारके -
एतत्संगतसत्वानामेषधर्म्मः सनातनः अ
वष्टेयेनिधीयते - रामायणे -
अवस्तारः - पडदा भाषायाम्
विसंवादः - प्रमाणानुसरणाभावः
अविसम्वादी - प्रमाणान्तरानुसारी -
उत्तानेनैवहस्तेनप्रोक्षणं परिकीर्तितम् न्य
चताभ्युक्षणं प्रोक्तं तिरश्चावोक्षणं स्मृतमि
ति - अव्रतानाममन्त्राणां जातिमात्रोपजी
विनाम् नैषां प्रतिग्रहोदेयो न शिलाता
रयेच्छिलाम् इति मनुः -

वृ० अश्मन्त - अश्मन्तक - स्त्री चुल्ल्याम्
२ अश्मभाल - नपुं - अश्मेवभाजयति चूर्णी
तैकरोति भजरिणच अण् पृषोदरादि
त्वाद्रस्यलत्वम् भाषा - अमामजिस्ता-
वक्रदनः भल्लातकवृन्तीफलदाडिमफ
लकल्कसाधितंकुस्ते लिङ्गमर्दनवि
धिनाकटुतैलंवाजिलिङ्गमम् १ कनक
कुसुमरसरणवर्तितहयगन्धामूलविस्वप
र्युषितम् माहिषमिहनवनीतंगतवीजक
नकफलमध्ये २ गोमयगाढोद्वर्तितपूर्वं
पक्वादनेनसंलिप्तम् भवतिहयलिङ्गस
दृशं लिङ्गं कठिनंस्त्रियोदयितम् ३ अश्व
गन्धावरीकुष्ठमांसीसिंहीफलान्वितम्
चतुर्गुणेनदुग्धेनतिलतैलंविपाचयेत्
स्नानलिङ्गकर्णपालिवर्द्धनंस्त्वदृणादि
दम् -
अश्मन्यः अश्विनीनक्षत्रम् -
अश्वल - [illegible] - चुल्ल्याम् - पु०

अष्टाङ्गधूपः - पलंकषानिम्बपत्रं वचाकु
ष्ठं हरीतकी - सर्षपाः सयवाः सर्पिर्धूप
नं ज्वरनाशनम् । इति चक्रदत्तः
अत्याहारमसंदिग्धं सारवद्विश्वतो मुख
म् अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः ।
स्तोभः हुंफडादिवन्निरर्थकः शब्दः -
अस्वन्तः - अशुभम् -
ईषद्धौतं नवं श्वेतं सदशं यन्नधारितम् -
अहतं तद्धि जानीयात्पावनं सर्वकर्मसु ।
निर्णेजकाद्यानीतं यदहतं तत्प्रचक्षते -
आकाशजननी - वगंडी - दुर्गप्राकार
भित्तौ शूराणामुपवेशस्थानानि वगंडी -
आकाशजननी - भाषा - मोरवे
आह्वायिकः - प्राड्विवाके अक्षदर्शके
च-
आख्यात - त्रि॰ तिङ्रूपे प्रत्यये तल्लक्ष
णम् धात्वर्थेन विशिष्टस्य विधेयत्वेन बो
धने समर्थः स्वार्थयत्नस्य शब्दो वाख्यात
मुच्यते । आख्यातं चैतत् धात्वर्थावच्छि
स्वाः न्नस्वार्थयत्नविधेयताकान्वयबोधसम
र्थः शब्दो वाख्यातम् तदेव च तिङ् इत्य
पि कथ्यते - तिङाख्यातयोः पर्यायत्वात् -

बृ. धा. भक्तिक्लिष्टौ स्वामी स्थितौ दपरेषां न संशयः अ
१० निवृत्ते सपिण्डत्वे सकुल्यानां न हि सिध्यति २
अस्वामिनाच यत्कृतं गृहदेवार्चणादिकम्
सुहृद्दन्धुसकुल्यस्य न तद्योगेन हीयते २
विवाहस्त्रोत्रियै भक्तं राज्ञामात्यैस्तथैव च
सुदीर्घेणापि कालेन तेषां स्वत्वं न सिध्यति
२ इति बृहस्पतिः अत्रापि विशेषमाह त
त्रैव स्त्रीधनं च नृपेन्द्राणां कदाचन न जी
र्यति अनागमं भुज्यमानमपि वर्षशतैर
पि
आघारः - प्रदित्तं - आ - गृ - सू - कर्मण्य
च घृतेभावेऽप्यत्र आहितवन्ने वायव्यको
णादारभ्याग्नेयं यावत् - नैर्ऋतीमारभ्यैशा
नीयावच्चावेच्छिन्नधारया २ घृतसेचने तू
सीमाघारवाघार्याज्यभागौ जुहुयादग्नये
स्वाहा सोमाय स्वाहा - आश्वलायनगृह्ये तू सत्रं
ष्णीं मन्त्रवर्जम् उत्तरपश्चिमायाम् आरभ्यद
क्षिणपूर्वां प्रत्यविच्छिन्नामाज्यधारां हरेत्
तथा दक्षिणपश्चिमामारभ्य उत्तरपूर्वामन्त्यो
घारयेत् इति तद्वृत्तिः इति ऋग्वेदिनाम्
यजुर्वेदिनान्तु मन्त्रोच्चारणापूर्वकं तत्सेचन
मिति भेदः उभयवेदिनामप्याघारकाले
प्रजापतीन्द्रयोर्मनसा ध्यानम् आज्यचक्षु २०

वेचन्तवीरं ग्राह्यमितिविवेकः
ग्राचाम - भाषा - पिच्छ
ग्रन्नम् उपकरणमपि स्त्रियोन्नपशवोन्नं
राज्ञामितिवत्-
ग्राम्न लोमन् - भा. दाढी
वेदान्तिनये हिरण्यगर्भलिङ्ग शरीरं महत्त
त्वम् - ग्रस्न दादि लिङ्ग शरीरं चाहङ्कारतत्वं
मित्याख्यायते -
न्याद्यदादीनुरोन्मादिर्दिवादिः स्वादिरेवच-
तुदादिश्च रुधादिश्च तनक्र्यादिचुरादयः १
ग्राङ्गबोधे विपराभ्यां परस्मान्नजयतेरात्म
नेपदम् - परिव्यवेभ्यः क्रीणातेस्तङ् स्यात्कर्त
रि नेविधाः २ ग्राङो दोन्नु खविस्तारे शपयोपरा
पतेर्भवेत् - पद्यन्त्वाङः क्रीडः स्यात् कूजार्थात्
तङ्मतः ३ ग्राङो नौतेः पृच्छ तेश्चतमायामा
गमेर्भवेत् नाथतेराशिषिभवेज्जिज्ञासायां
नुशिक्षतेः ३ हर्षोद् नान्तवासायत्ले स्वमार्थो
न्किरस्तनङ उपात्कर्तरिसुदनस्य चनन्थ्यारेय
पतिलि ४ प्रतिज्ञायांनिर्णयार्थमाङ्गये स्मोद
बोधने वर्त्तमानेतिष्ठतेस्तङ् तथाकर्मविवर्जि
तात् ५ देव(ना ४ पूजासङ्गमयोमैत्र्यांमार्ग
यतौतथा उपात्तङ् तिष्ठतेश्चैवमंत्रसाधन
काश्चतः ६ तथासंप्रपरिभ्यः स्मउदश्चान्

द्धकर्मणि सांगकर्मकर्मकात्तङ् उद्विभ्यां तपते
वृ: ११ भवेत् ७ हनोयमस्स्वाभ्यां मनादङः कर्त्तरित
ङ् भवेत् - समः कर्मविवक्षायां गम्यृच्छिप्रछ
शोभवेत् ८ उपसर्गाद्दस्यतङ् इतेश्च विभाष
या - निसंमुपेभ्यो ह्वयतेः स्पर्द्धायामाङः एव त
ङ् ९ सूचने भर्त्सनेऽवक्षेपे सहसे वप्रवर्त्तने स
तेगुणानराधाने सेवायां विनियोजने क
थने वक्रमनस्तङ् स्यात् धेर्नुसहनेनथा १०
वेः शब्दकर्मणः स्तस्मात्कर्मणाररहिताच्च
तङ् शास्त्रार्थवेदनेनैव सम्माने तत्त्वनिश्चये
११ उत्क्षेपणे प्रार्थने च ऋणानिर्यातने तथा
भ्रान्तिकस्थापणेभृत्यां व्यये चापनयेतथा -
अमूर्त्तेकर्तृगेकर्मण्यपेषु तङ् नयतेर्भवेत्
सि × १२ उत्साहे चापि हितौ वृद्धौ चक्रमतेस्तङ्
चैतदर्थे = परोपाभ्यां चैतराथे तजगेत्यो निह्नुमे
१३ प्रोपाभ्यां तङ् समारम्भे वेः पादचलना
र्थकात् विभाषया क्रमे स्तङ् स्यादुपसर्गवि
वर्ज्जितात् १४ निह्नवे ज्ञो कर्मकाच्च सम्प्र
तिभ्याम चिन्तने यत्नेचज्ञानपूर्वानौविम
तावुपसान्त्वने १५ स्पर्द्धने च वदेर्व्यक्ते सं
भूयोच्चारणेतत् तङ् अनोरकर्मकाद्यातेः ११

23

सहेते विमतेनुवा १६ अवादिरः कर्त्तरित
ङ् प्रतिस्तायां समस्तथा उदङ्करः कर्मयुक्ता
त्समो युक्तात्तृतीयया १७ तृतीयाचेच्चतु
र्थ्यर्थे दाणः सम्पूर्वकात्तु तङ् साक्षस्तप
श्यते अस्यास्तमनात्कर्त्तरीष्यते १८ अ
नोर्जिज्ञासतेनैव श्रुत्याङ्भ्यांचतथाश्रुवः
स्वरादघ्नो पसर्गात्तङ् भुजेर्नेयत्नपात्रके
१९ अपालने भुजेस्तङ् स्यात्तपः सम्पू
र्वकात्तङ् अस्मत्यर्थे स्यधातोर्यत्कर्मी
ण्यन्तस्यचेद्भवेत् २० ण्यन्तस्यकर्त्तासत
दातस्मात्ण्यन्ताद्भवेत्तङ् णिजन्ताच्च
गृधेर्वञ्चेः प्रतारार्थेतु तङ् भवेत् २१ कवि
कल्पद्रुमग्रन्थेभिन्नेचन पठितास्तुये णि
जन्ताश्चाभयपदास्तेभ्यस्तङ् कर्त्तृगे फले
२२ अपादेयमो ग्रन्थेसमेदाङ्भ्यस्तथै
वतङ् उपसर्गाहृते तस्मात्तथात्तङ् कर्त्तृगेफ
ले २३ समीपस्थपदेनैव कर्त्तृगस्यफलस्य
चेत् द्योतनं स्यात्तदा तत्र तङ् कर्त्तरि विभा
षया २४ परस्मैपदमिच्छन्ति आत्मने
पदिनः क्वचित्

मनुः अरोगाः सर्वसिद्धार्थाश्चतुर्वर्षशता
युषः कृते त्रेतादिषु ह्येषामायुर्ह्रसति पा

दग्धाः ८ ... आरग्वधाद्यं तैलम् आ
वै. रग्वधं धवं कुष्ठं हरितालं मनःशिला रजनी
१२ द्वयसंयुक्तं पक्वं तैलं विधानवित् एतेनाभ्य
ङ्गयेत्तस्य शीघ्रं श्वित्रं विनश्यति ९
आरग्वधतैलं रोमहम् आरग्वधमूलं कर्ष
द्वितयं शंखचूर्णस्य हरितालस्य च खर
जे मूत्रप्रस्थे कटुतैलपक्वम् - तैलं तदिदं
शंखहरितालचूर्णलिप्तात् निर्मूलयति व
रोमाण्यन्येषां सम्भवो नैव - चक्रदत्तः
आरट्ट-त्रि. ईषद्दृष्टः आदयः - समा० एका
र्थेनगमनसाधने रथे - यका - वगी - ग्रमं
तौ -
आरनालं दधिक्षीरं कन्दुपक्वं च सक्तवः स्वे
दपक्वं च तक्रं च मूढस्यापि न दुष्यति अत्रिः
आरा - स्त्री - चर्मभेदकास्त्रभेदे - प्रतोदे च
आरात्रिकभ्रामणलक्षणम् आदौ चतुःपा
दतले च विल्मो द्वौ नाभिदेशे मुखमण्डले
कम् सर्वेषु चाङ्गेषु च सप्तवारान् आरात्रिकं म
ङ्गलन्तु कुर्यात् ९
आरीहणक - शत्रुघातकनिवृत्ते -
आलम् - हरिताले -
आह्निकः - पाणिनिमुनौ - केतुग्रहे च -
आरू - आड् - भाषा - १२

आरोग्यशाला- शफाखाना-भाषा-
आर्यहलम्- अव्ययम् बलात्कारे-
प्रवरस्तु गोत्रप्रवर्तकस्य नैर्व्यावर्त्तको मुनिग
ण इति माधवः-
आलावर्त्त-न पुं० वस्त्रनिर्मितवस्त्रे-
शर्करालु- शकरकन्दी- भा०
आलुर- लाल्पीदाजुहले- भा०
आस्फोटनी- नस्तर- भा०
आलार्थम्: इ-धात्वर्थयोर्व्यापारेण विषयी
कार्य्यबाधनिश्चयकालिके तत्कर्मभा
ववत्तितत्कर्मवत्त्वेन ज्ञेये-
सभिकः- यस्य गृहे द्यूतकारिणां सभा-
आह्वानपत्रम्- तलबनामा-
इक्षुपत्रः- पुं० जवार- धान्यभेदे-
इङ्ग्रेजः- पुल्लि० इङ्गनेभोगार्थम्- इगि-
रन्- इङ्ग्रः लण्डदेशस्तत्र जायते- जन- ड
- अनुक्तमासः लण्डस्य जने- पूर्वा
म्नायेनवशतं षडशीतिः प्रकीर्तिताः- फिरङ्ग
भाषया मंत्रास्तेषां संसाधनात्कलौ १ अधि
पा मण्डलानाञ्च संग्रामेष्वपराजिताः इ
ङ्ग्रेजा नवषट्पंच लण्डजाश्चापि भाविनः
२ मेरुतंत्रे प्रकाश २३- उक्तम्-

अथसयदापितृलोककामः पितृनावाहयति
-तेनपितृलोकेनसम्पन्नो महीयतइत्यादि
१३ श्रुतिः- पातञ्जलसूत्रम् चित्तस्या
लम्बने स्थूलाभोगो वितर्क इति व्यासवच
नम् आभोगः स्वरूपसाक्षाद्वतीप्रज्ञा-
मीमांसकनये भावनानाम भवितुर्भवना
नुकूलोभावयितुर्व्यापारविशेषः-
पुरुषप्रवृत्त्यनुकूलोभावयितुर्व्यापारवि
शेषः शाब्दीभावना-
प्रयोजनेच्छाजनितक्रियेच्छा विषयव्या
पारः आर्थीभावना- यागेच्छा=
ज्ञानरूपः= वृत्तिप्रभाकरे- भाषानिबंधे-
विशेष्यप्रकाशकोऽन्तःकरणाज्ञानयोः परि
णामः वृत्तिः- क्रोधसुखादीनामन्तःकर
णपरिणामत्वेऽप्याकाशादीनामज्ञानपरि
णामत्वेपि विषयप्रकाशकत्वाभावान्न
वृत्तित्वम्- तत्त्वानुसन्धानाद्वैतकौस्तुभा
दौक्रोधादीनां वृत्तिशब्देनाव्यवहारात् केचि
नु क्रोधादीनपि वृत्तिशब्देन व्यवहरन्तिना
द्वैतवादिन इति सिद्धम्-
प्रमाणजन्यंज्ञानं प्रमा-
जीवज्ञानमन्तःकरणवृत्तिरूपम्- ईश्व
रज्ञानंमायावृत्तिरूपम् जीवादृष्टजन्य

नभ्रमाजन्यम् अतोनभ्रमा नचभ्रमः किन्तु
यथार्थम् - भ्रमाजन्यं किम् इन्द्रियादिज
न्यम् -
ईश्वर तज्ज्ञानेच्छाकृतिदिक्कालादृष्टप्रागभा
वप्रतिबन्धकाभावाः एतेनव साधारणानिका
रणानि - एतद्भिन्नान्यसाधारणानि -
व्यापारः कारणं नकरणम् -
न्यायनये श्रोत्रेन्द्रियं मनसानित्यम् -
भेरीदण्डसंयोगात्तदुपहित आकाशे शब्द उ
त्पद्यते तस्मादन्यः शब्दः दशदिगुपहितेशे आका×
जायते ततोन्यः परन्तु नतत्प्रत्यक्षम् क
र्णोपहितेनतत्प्रत्यक्षम् -
उपाध्यभावयोः स्वाश्रयेस्वरूपसम्बंधः स्व
रूपस्यैवविशेषणता न्यायनये -
चाक्षुषप्रत्यक्षयोग्यगुणाः रूपसंख्यापरि
माणपृथक्त्वसंयोगविभागपरत्वापरत्वद्र
वत्वानिनव - येषां मते मन इन्द्रियं न ते
षां मते इन्द्रियजन्यंज्ञानं प्रत्यक्षमिति प्रत्य
क्षलक्षणंनास्ति किन्तु विषयचेतनस्यवृ
त्तिचेतनाऽभेद इति तल्लक्षणम्
बुद्धितत्स्थचिदाभासावित्यत्र व्याप्नुतइ
त्यस्य विषयीकुरुत इत्यर्थः ब्रह्माकार
वृत्तौ चिदाभासविषयं ब्रह्म नास्ति किन्तु

१४ वृत्तिमात्रविषयम् यत्तु शब्दाविषयं ब्रह्मोक्तं
तत्तु शक्यार्थविषयं तत्तु नास्तीत्यभिप्रायः। कि
न्तु लक्ष्यार्थविषयम् तत्रापि चिदाभासफल
विषयं न किन्तु आवरणभङ्गरूपवृत्तिवि
५५ षयं नावृह्नरयस्ति - एवं मानसज्ञानविषयं तु
तु शमदमादिसंस्काररहितचित्तमनसो
विषयं न प्रत्यभिज्ञावत् प्रमाणद्वयेन प्रत्य
क्षेन दोषः -
वेदान्तिनये समवायस्थाने तादात्म्यसंबंधः -
वेदान्तिनये श्रोत्रेन्द्रियमाकाशकार्यम् न्या
यशास्त्रेतु आकाशरूपम् -
अव्याप्यवृत्तिपदार्थस्याधिकरणता व्या
प्यवृत्तिरस्ति अव्याप्यवृत्तिर्नेति सिद्धान्तः -
संस्कारस्योद्भूतत्वे हेतुत्रयं सम्बन्धिज्ञान
म् १ सदृशपदार्थज्ञानम् २ चिन्तनं च ३
तेभ्यः स्मृतिर्जायते यथा पुत्रदर्शनात्पितुः
स्मृतिः १ एकान्तमस्थिरदर्शनादन्यनपस्थि
नः २ एकान्तेस्थित्वा चिन्तनात् ३ एवं च
पदज्ञानात्पदार्थस्मृतिः सम्भवति सा च
पदपदार्थसम्बन्धरूपवृत्तिज्ञानाज्जायते -
न्यायनये शक्तिरीश्वरेच्छा - मी
मांसकमते पदार्थान्तरम् - वैयाकरणानां

ये पदपदार्थयोस्तादात्म्यसम्बन्धः शक्तिः
मञ्जूषासारे तु योग्यता शक्तिरुक्ता - मञ्जू
षायां तु वाच्यवाचकभावमूलं पूर्वोक्त
तादात्म्यम् - पातञ्जले चैवम् - वेदान्ति
मते तु सामर्थ्यं शक्तिः सा च पदानां स्वार्थ
बोधकत्वे वह्न्यादीनां दाहादिवत् - इयान्
भेदः वह्न्यादेर्ज्ञातत्वेनाज्ञातत्वेन वा - पदे तु
ज्ञातत्वेनैव पदार्थस्मृतिरूपकार्यहेतुता -
नन्वतीतपदे पदध्वंसात्कथं पदार्थस्मृ
तिरिति चेन्न मीमांसकमते पदं नित्यम्
अनित्यपक्षे पदध्वंसेऽपि पदज्ञानात् स्मृ
तिः पदस्य तस्मात्पदार्थस्मृतिर्भवति -
गदाधरस्तु पदेन शक्तिः किन्तु पदज्ञाने
एवं च पदस्य तज्ज्ञानस्य वा सामर्थ्यं श
क्तिः गौतमसूत्रे तु जात्याकृतिव्यक्त
यः पदार्थ इति अवयवसंयोगः आकृ
तिः - एवं च कपालसंयोगसहितघट
त्वविशिष्टघटे शक्तिरिति सिद्धम् एवं
च वाच्यतावच्छेदकवाच्ये शक्तिः तेन
अवाच्यस्यापि घटत्वस्य प्रतीतिः शक्ति
स्तु घटव्यक्तावेवेति दीधितिकारमते -

वृ.प्र. गामानयत्वमितिवाक्ये द्वितीयार्थकर्म
१५ णोगवि आधेयतासम्बन्धः स च वृत्तिप
देनोच्यते आङ्पूर्वस्य नयतेरर्थे आनय
नेकर्मतायानिरूपकता संबंधः यकारो
त्तराकारस्य कृतिः प्रेरणा चेत्यर्थद्वयम्-
तत्र कृतावानयनस्यानुकूलता सम्बन्धः
कृतेस्त्वंपदार्थे आश्रयता सम्बन्धः प्रेर
णायास्त्वंपदार्थे विषयता सम्बन्धः एवं
च गोवृत्तिकर्मतानिरूपका नयना
नुकूलकृत्याश्रयः प्रेरणाविषयस्त्वंप
दार्थः इति वाक्यार्थः -
पदज्ञानेन तदर्थस्मृतिर्व्यापारः वाक्या
र्थज्ञानम्फलम् -
वैयाकरणानये द्विरेफपदे लक्षितल
क्षणा न किन्तु लक्षणैव सा यथा द्वि
रेफपदस्य भ्रमरपदे शक्तिः तस्य भ्रम
रेण साक्षात्सम्बन्धः सिंहो देवदत्त इत्या
दौ तन्नये लक्षितलक्षणा - सिंहपद
स्य क्रूरताक्रूरताधर्मवति प्रस्तुते लक्ष
णा - सिंहशक्यस्य पुरुषेण सह सा
क्षात्सम्बन्धाभावात्केवललक्षणा न १५

किंतु शूरतादिभिः सह सिंहशक्यस्याधे
यतासम्बन्धः शक्यसम्बन्धिशूरतादी
नां तु पुरुषेऽऽश्रयतासम्बन्धः परन्तु सिं
हशूरतायाः पुरुषशूरतायाश्चाभेदस्वी
कारे सिंहशूरतायाः पुरुषेऽधिकरणता
सम्बन्धः भेदे तु सिंहशूरतायाः पुरुषे
स्वसजातीयशूरताधिकरणतासम्बन्धः
स्वशब्देन सिंहशूरता अनयारीत्यावा
क्यस्य परम्परासम्बन्धात् सिंहशब्दस्य
शूरतादिगुणविशिष्टे पुरुषे लक्षितल
क्षणा यतः शक्यपरम्परासम्बन्धो हि ल
क्षितलक्षणा –
लक्षितलक्षणापदस्य रूढिवृत्तिर्न सम्भ
वति कोशादावनुल्लेखात् योगवृत्ति
रपि न लक्षितस्य शूरत्वस्य गुणस्य व
र्णात्मकत्वाभावात् न तस्य लक्षणास
म्भवति यतः पदे लक्षणावृत्तिर्न पदार्थे
-एवं द्विरेफेऽपि लक्षितभ्रमरपदस्य म
धुपे शक्तिर्न तु लक्षणा वक्तृतात्पर्या
भावादपि नोभयोः सा सम्भवति अ
न्यथा गङ्गापदेन मीनादीनामपि ग्रह

र॰प॰ १६ णासंभवात्- अनयोर्वक्रतात्पर्य्ययोस्तु मध्ये
सिंहसमकुरूपोऽस्ति- तथापि भागत्या
गलक्षणा लक्षितलक्षणापदे- वक्तृता
त्पर्य्यविषय इति भागं त्यक्त्वा शाक्यसम्ब
न्धीति लक्षितशब्दार्थः लक्षणापदस्या
प्यर्थः शाक्यसंबंधः तत्रापि शाक्यापरंप
रित्यक्तसम्बंधमात्रे लक्षणा तथा च शाक्य
सम्बन्धिसंबंधो लक्षितलक्षणार्थः योग
वृत्त्यासंभवेत्- अथवा लक्षणाशब्दस्य
अन्तशाक्यसम्बंधरावार्थः तथापि योग
वृत्तिः सम्भवति लक्षितेन शाक्यसम्बंधि
द्वारा लक्षणा नाम शाक्यसम्बन्धः शाक्यस
म्बन्धः कचित्साक्षात् कचित्प(?) क्यस
म्बंधिद्वारा अतोत्र लक्षितपदेन च लक्षणा
नोत्तरत्र षष्ठीसमासेत्वमयत्र-
शास्त्रस्यासाधारणसङ्केतः परिभाषा तया
र्थबोधकः शब्दः पारिभाषिकः अथवात्र
कर्मधारयः लक्षिता लक्षणा लक्षितलक्ष
णा लक्षिता लक्षणावती असाधारणधर्मो
हि लक्षणम् स च शाक्यसम्बन्धरूपः तथा
च शाक्यसाक्षात्त्वविशिष्ट संबंधत्वरहिता
केवलशाक्यसम्बन्धत्व रूपलक्षणावती ल १६

क्षणा लक्षितलक्षणा एतेन परम्परासम्बन्धेऽस्या
श्रभितार्थता- कर्मधारयेणु न भागत्यागलक्षणा
पि- केषांचिन्मते सिंहो देवदत्त इत्यादौ तत्री
यावृत्तिर्गौणी- आलंकारिकास्तु व्यञ्जनां
अपि चतुर्थी वृत्तिमन्यन्ते-
प्रयोजनवती तथा निरूढा इति द्विविधा ल
क्षणा गङ्गायां घोष इत्यत्र घा- शीतपाव
नत्वादिप्रयोजनवती- नैयायिकनये तु शै
त्यादिकमनुमानगम्यं न शाब्दबोधविष
यम् गङ्गातीरं शैत्यपावनत्वादिमत् गंगा
पदबोध्यत्वात्- गंगावत्-
यस्य पदस्य यत्रार्थेन शक्तिः शक्यवृत्तस्यार्थ
स्य प्रतीतिर्यस्मात् पदात् सर्वस्य प्रसिद्धा तस्मिन्न
र्थे तत्पदस्य प्रयोजनशून्यत्वलक्षणा निरूढ
लक्षणोच्यते यथा कौशेनीलादिपदानां
गुणे शक्तिः गुणिनि निरूढा गुणगुणिनोः
शक्तिकल्पने तु गौरवम् शक्यतावच्छेद
कैकधर्मस्याप्यलाभः परं तु सा शक्तिस
रूपा किंचिद्भिन्नलक्षणा यत्रानादितात्पर्यं त
त्र निरूढेति वदन्ति यत्र प्रयोजनमनादि
तात्पर्यं च न भवेत्स्वेच्छयैव ग्रन्थकृत् लाद

वृ. प्र. णिकशब्दद्वयोऽं निःप्रयोजनं कुर्य्यात् तत्रतृ
८ तीयैश्चिद्धकलक्षणाभवति परन्तु तांसमीची
नांविद्वांसोनमन्यन्ते—
महावाक्ये चेतनभागस्यलक्ष्यार्थेनतादात्म्य
सम्बन्धः वाच्यस्यजडभागस्यचेतनेऽधि
ष्ठानतासम्बन्धः कल्पितः अतोनासङ्गत्व
हानिः तादात्म्यसम्बंधः स्वरूपसम्बंधः अ
पि तोनस्वभावस्यासङ्गत्वस्यहानिः मायावि
शिष्टमन्तःकरणविशिष्टंच तत्त्वंपदयोःश
क्यम् मायोपहितमन्तःकरणोपहितंच
तयोर्लक्ष्यमतोनपुनरुक्तिः उपहितोप
रमार्थतोऽभिन्नौ—
अथवा महावाक्ये शक्त्यैवाद्वितीयब्रह्मबो
धः विशिष्टवाचकपदार्थविशेषणीभूता
न्यपदार्थस्य विशिष्टार्थेयत्रसम्बन्धोन
सम्भवति तत्रविशिष्टवाचकस्यविशे
षणंपरित्यज्यविशेष्यार्थप्रतीतिःशक्त्यै
वसम्भवति यथा अनित्योघटइत्यत्रघ
टत्वंपरित्यज्यानित्यस्यघटव्यक्तौसम्बन्धः
गेहेघटः घटेरूपं इत्यादावपि उत्पन्नोघ
टः नष्टोघटइत्यादावपि परन्तुनविशेषं
त्यक्त्वा विशेषणस्यप्रतीतिः नित्योघटइ ८

न्यादौ दोषात् अतोभागत्यागलक्षणा सर्वत्र
हेया भेदद्वयमेवास्ताम् -

यद्विधालिङ्गेषु अपूर्वता इति पदस्या
र्थः प्रमाणान्तरेणाज्ञातता -

न्यायनये पदानां सामीप्यमासत्तिः -

समानाधिकरणज्ञानद्वयस्योत्पत्तिरेकक्ष
णेनभवतिइतिसिद्धान्तः ज्ञानद्वयाधारस्तु
एकः क्षणोभवति -

समानविषयकयोः प्रत्यक्षज्ञानशाब्दज्ञान
सामग्र्योः प्रत्यक्षसामग्रीप्रबला यथाघ
टवद्भूतलम् - भिन्नविषयकयोस्तु शा
ब्दसामग्रीप्रबला यथाभूतलसंयुक्तघटे
नचक्षुः संयोगे उत्पन्ने जातइति

आकाशेशब्दस्यसमवायः कण्ठादौ अव
च्छेदकतासम्बन्धः -

सादृश्यज्ञानजन्यज्ञानं वा वैधर्म्यज्ञानज
न्यज्ञानमुपमितिरिति वेदान्तिनः न्यायन
येतु संज्ञायाः संज्ञिनिवाच्यताज्ञानमुपमितिः -

ज्ञानस्यज्ञानमनुव्यवसायः -

अर्थस्य ~~नाम~~ उपपादकवस्तुनः आपत्तिः
नाम कल्पना अर्थापत्तिरिति - अर्थस्या
पत्तिर्यस्मादितिवा - सा द्विधा दृष्टार्थाप

वे.प्र. त्तिः श्रुतार्थापत्तिश्च देवदत्तो दिवाऽभोजी स्थू
२८ लः इत्यादावाद्या गृहेऽसन् देवदत्तो जीवतीत्या
दौ द्वितीया साद्वितीयापि द्विधा अभिधा
नानुपपत्तिः अभिहितानुपपत्तिश्च द्वार
म् अथवा पिधेहीत्यादौ एकदेशाध्याहारे
आद्या अस्या अर्थाध्याहारवाद (शब्दाध्या
हारवादः इत्याख्याग्रंथान्तरे — अत्राभिधा
नानुपपत्तिरूपा श्रुतार्थानुपपत्तिः —
द्वितीयानु स्वर्गकामो यजेतेत्यादौ अर्थस्याप्
र्वस्य कल्पनां विना स्वर्गानुपपत्तेः अथवा
तरति शोकमात्मविदिति बंधमिथ्यात्वक
ल्पना — बंधमिथ्यात्वमनपादके शोकनिवृ
त्तिरुपपाद्या — महावाक्येतु अर्थापत्तिर्वि
षयमस्ति भेदस्यौपाधिकत्वज्ञानस्य विक्षेपाद
हत्वाद विक्षेपः श्रुतत्वात् शुक्तौ रजतं नेत्यत्र
रजतमिथ्यात्वकल्पनात् —
निर्विकल्पसमाधौ ब्रह्ममात्रशेषे मनोविलया
त् अनात्मवस्तुनोऽभावात् तस्मानसंक
ल्पनम् तथाच सकलद्वैतं मनोमात्रमिति सि
द्धम् —
निषेधमुखप्रतीतिविषयोऽभावः प्राचीननैया
यिकनये सोऽद्युक्तः ध्वंसप्रागभावयोस्तद
भावात् — सम्बन्धसादृश्यभिन्नत्वेसतिप्रति २९

योगिसापेक्षत्वनीतिविषयोऽभावइति नवीननै
यायिकमते-
प्रागभावध्वंसयोरनाधारः कालः प्रतियोगि
नआधारइतिनियमः
यत्रभूतलादौ पूर्वं घटोऽस्ति कदाचित् घटशू
न्यकाले सामयिकाभावः वायौरूपस्यात्यं
ताभावः कालत्रयेप्यसत्त्वात्- अनादिःसा
न्तः प्रागभावः १ सादिरनन्तोध्वंसः २ सादिः
सान्तः सामयिकः ३ अत्यन्तान्योन्याभावौ
अनाद्यनन्तौ ४ अभेदनिषेधकोऽभावो
न्योन्याभावः-
तादात्म्यं तद्वृत्तित्वम्वा अभेदसम्बन्धस्तव-
अभावज्ञानं द्विविधम् भ्रमः प्रमाच भ्रमो
द्विविधा प्रत्यक्षः परोक्षश्च-
अन्यपदार्थस्यान्यरूपेण ज्ञानमन्यथाख्यातिः-
वेदान्तमतावलम्-
एकस्यतत्त्वादप्रच्युतस्य पूर्वविपरीतासत्यानेक
रूपावभासो विवर्तः-
सादृश्यपूर्वसंस्कारो दोषश्चेतत्रयं कल्पनासाम
ग्री- बाधकोन्नेयमध्यासत्वम्-
उभयत्रसमोदोषः परिहारस्तुल्यतादृशः-
लौकिकवैदिकशब्दयोरभेदः स्वराद्युपाधिक
त्वाद्भेदव्यपदेशस्येति अन्यथा लोकवेदाधि

१९ कारणविरोधः अवश्यमितिसूत्रम् प्रयोग
चोदनाभावादर्थैकत्वमविभागात् - आकृत्य
धिकरणे पोह्यमनया लोकवेदयोः पदपदार्थ
न्यत्वात्तन्यत्वे विचार्यते नचलोकवेदयोस्ता
वत्पदान्यत्वं स्वरादिधर्मभेदात् पदान्यत्वात्त
दर्थोऽपि भिद्यतेति प्राप्ते सिद्धान्तः अर्थैकत्वं प
दपदार्थयोरेकत्वं कुतः अविभागात् प्रत्यक्ष
त्यभिज्ञानात् यएव हि वर्णा लौकिके पदे प्रती
यन्ते तएव वैदिकेऽपि पदे प्रत्यभिज्ञायन्ते - वर्णा
त्मकं च पदम् ततो न लौकिकात्तस्मात्तद्भिद्यते
यत्तु स्वरादिधर्मभेदाद्भेद इति तन्न अर्थभेदहेतो
रेव धर्मभेदस्य भेदहेतुत्वात् नहि च सर्वधर्म
भेदहेतुत्वं युज्यते वैकल्पिकस्वरादेर्व्यभिचा
रात् र×रावेति×वं च सति क्रियाकारकसंसर्गा
त्मकप्रयोगचोदना उपपद्यन्ते अन्यथा
वैदिकपदार्थज्ञानोपायाभावात्संबंधस्य चशा
स्त्रहेतुत्वात्तासामभावः प्रसज्येतेति -
शरीरं नाम निरपेक्षत्वगिन्द्रियाधारः नि
रपेक्षपदं मांसाद्यवयवानां प्रत्येकं शरीरत्वेनि
रासायतेषामितरावयवसापेक्षाणामेव त्वगा
धारत्वात् -

पंचदशपाम्

संविल्स्वाभाविकभेदशून्या उपाधिपरामर्शम
न्तरेण विभाव्यमानभेदत्वाद्गगनवत्-
शब्दसम्वित्स्पर्शसंविदो न भिद्यते संवित्त्वा
त्रससंविद्वत्-

संवित्स्वप्रकाशा अवेद्यत्वे सत्यपरोक्षत्वात्
व्यतिरेके घटवत्- स्वसंवेद्यत्वे कर्मकर्तृत्व
विरोधः परवेद्यत्वेऽनवस्था नानोविशेष
णासिद्धो हेतुः-

सम्विदात्मा नित्यश्चेत्स्वयंप्रभत्वात् व्यतिरे
के घटवत्- आत्मा परानन्दरूपः परप्रे
मास्पदत्वात् व्यतिरेके घटवत्- मा न भूव
मित्याद्यनुभवान्न स्वरूपासिद्धिः परत्वेतु
क्रिस्तु नारे पत्युः कामाय पतिः प्रियो भवति कि
न्त्वात्मकामायेति- जीवब्रह्मणोरैक्यन्तु के
वलश्रुत्यैव प्रतिपाद्यते- जीवस्य सच्चित्सुख
रूपत्वन्तु युक्त्यापि-

परानन्दरूपतायाः अभाने निरतिशयस्नेहो
न भवेत् विषयसौन्दर्यज्ञानजन्यत्वात्स्नेह
स्य- भाने तु लौकिके वैषयिके सुखेऽच्छा
न स्यात् परानन्दलाभात् अस्यान्तरम्

पं॰ द॰ २० परमानन्दरूपता भानेपि न भासते अध्येतृमध्य
गतब्रह्मध्वनिवत्- अतइयं नाहमस्वरा- प्रति
बन्धके सति भानेप्यभानम् नानुपपत्तिरतः
प्रतिबन्धोऽविद्या ध्वनौ समानाभिहारः-
मायायां प्रतिबिम्बितं ब्रह्मेश्वरः अविद्यायां
प्रतिबिंबितं ब्रह्म जीवः-
तमः प्रधानायाः प्रकृतेः पंचभूतानि भूता
नां सात्विकांशेभ्य एकैकेभ्यः ज्ञानेन्द्रियाणि
समस्तेभ्यः सात्विकांशेभ्योऽन्तःकरणम्- त
द्विधा मनः संशयरूपा अन्तःकरणवृत्तिः
बुद्धिः निश्चयरूपा तद्वृत्तिः-
भूतानां रजोंशेभ्यः कर्मेन्द्रियाणि- मिलितेभ्यः
प्राणाः- ज्ञानें॰५ कर्मेन्द्रि॰५ प्राण॰५ मन बुद्धि॰१
योगः १७ लिंगशरीरम् तत्र तैजसो जीवो व्यष्टिः
- हिरण्यगर्भ ईश्वरः समष्टिः स्वात्मनाद
म्यस्तानात्- जीवब्रह्मणो लक्षणसाम्यादै
क्यम्- ब्रह्म तमः प्रधानां मायामुपाधित्वेनाद
योपादानम् अध्यासाधिष्ठानम्- शुद्धसत्वा
नामादायनिमित्तम्- मलिनसत्वप्रधानाम
विद्यामादाय त्वंपदवाच्यः-
विपरीतकल्पितेन नामजात्यादिरूपेण वर्त

तदितरसविकल्पकम् गुणक्रियाजातिद्रव्यसम्बन्धे
ष्वव्ययं विकल्पः तद्यथा गुणो निर्गुणो वर्तते
गुणवत्तिवेति आहन्यादयः पञ्चदोषाः-
मिष्टान्नस्थ गुणादयः सर्वे वस्तुस्वरूपेक
ल्पिता वर्तन्त इति-
कर्मव्यतिरिक्तत्वे जातिमात्राश्रयो गुण इति ता
र्किकाः संयोगविभागयोरसमवायिकारणं
कर्मेति तार्किकाः
प्रत्यगात्मा अन्नमयादिभ्यो भिद्यते तेषु मि
थो व्यावर्त्यमानेष्वपि स्वयमव्यावृत्तत्वात्-
यद्येषु व्यावर्तमानेष्वपि न व्यावर्तते तत्तेभ्यो
भिद्यते यथा पुष्पेभ्यः सूत्रम् गवादिव्यक्ति
भ्यो गोत्वं वा-
आत्मनः प्रमातृत्वेन सर्वज्ञानसाधारणमात्रे
सुरादीनां रूपादिज्ञानमात्रे चारितार्थ्यात्ते दु
णादेर्विचारस्योपलभ्यमानस्यानुपपत्तेस्त
त्कारणत्वेन मनोऽभ्युपगन्तव्यम्-
श्रोत्रादीनि भूतकार्याणि भवितुमर्हन्ति भूता
न्वयव्यतिरेकानुविधायित्वात् घटवत्-
ब्रह्मणः सामर्थ्यम् माया- मायाकार्यं वियदा
दि भूतान [illegible] यानन्तत्वं नश्यन्तत्त्वं नापि सत्
वहि शशकिवत्- नभसः संयोगान्यत्वं तेष
म

नः सतः पृथक्त्वाभावात् स्वतः सत्त्वाभावा
२१ च्छून्यस्यैव द्वितीयत्वेन - लोके चैत्रतच्छ
क्त्योर्जीविते पृथङ् लिख्यते - शक्त्याधिक्येन
जीवितवर्द्धने हेतुरभिज्ञकृष्यादिकमेव -
सति शक्तिरेकदेशेन सर्वत्र स्थितमद्धेव
घटशक्तिवत् - भक्तिरि सत्त्वमेव - तदुत्प
न्ने वियति सत्त्वमवकाशश्च वा वियति
ध्वनिः नासौ सति - आकाशस्य सत्तेति धर्म
धर्मवैपरीत्यम् मायाशक्त्याकृतमभिन्नता
मापाद्य - वियदादिष्वनुवर्त्तत्वात्सतो धर्मि
त्वं वियदादयो धर्माः रूपरसादिष्वनुवर्त्तस्य
द्रव्यस्यैव - रसादिभ्यो व्यावृत्तस्य रूपस्यैव
वाय्वादिभ्यो व्यावृत्तस्य नभसो धर्मत्वम् -
तथा अनुवृत्तो धर्मी व्यावृत्तो धर्मः - सतो
भिन्नमसत् वियदादिकम् - असत्त्वेन मा
नेस्यादिति चेत् तत्त्वविद्दृष्टत्वान्नरशृङ्गस
र्ववन्न विरुध्यते मिथ्यात्वात्तस्य -
सत एकदेशे माया - तदेकदेशे वियत् तदेक
देशे वायुः एवमग्रेपि - शोषस्पर्शगतिवेगा
निजधर्मा वायोः सद्रूपत्वं सदंशतः - सतो
विवेचने निस्तत्त्वत्वं मायायाः प्राक्तावोऽसत्त्व
मैवो धर्मो वायो - वायोर्नाकाशस्वरूपानुवृ २१

न्ति: किन्तु तत्कर्मस्वरूपस्यैव- वायोर्दशांशतस्तु
नाऽग्निमा:- मेर्दशांशतोन्यूनं ब्रह्मा
ण्डं भूमिमध्यगम् ब्रह्माण्डमध्ये तिष्ठन्ति भुव
नानि चतुर्दश भुवनेषु वसन्त्येषु प्राणि
देहा यथायथम् भूतविवेके श्लो० ५६
भूम्यादेर्मिथ्यात्वनिश्चयेन तत्स्वरूपोपमर्दः-
देहो नात्मा कार्यत्वात् घटादिवत् विपक्षे
बाधकाभावेनाप्रयोजकोयं हेतुरिति चेत् कृत
नाशाकृताभ्यागमदोषः-
प्राणो नात्मा जडत्वात् घटवत् मनोमयो वि
कारित्वात् देहवत्-
चिदाभासोपेता बुद्धिर्विज्ञानमयशब्दवाच्या-
सुषुप्तौ लीना जागरणे सर्वशरीरवर्तिनी-
सा नात्मा विलयाद्यवस्थावत्त्वात् घटवत्-
मनः करणं बुद्धिः कर्त्री एतेनान्योन्यं अन्त
र्बहिर्भावेन बुद्धिरन्तर्मनो बाह्यम्-
बुद्धिवृत्तिः काचिदानन्दप्रतिबिम्बिता अतः
आनन्दमयशब्दवाच्या सापि नात्मा का
दाचित्कत्वादभ्रादिवत्-
[illegible]नः ज्ञातृज्ञानयोरन्ययोर
भावात् ज्ञेयत्वम् नच सत्तया- ज्ञानस्यात्रे
यत्वाभावे दृष्टान्तः गगनादीनामन्यत्र सद्वृत्त्यो

२२ र्थेणं नत्वस्मिंस्तदर्पणायेता-
आत्मा स्वप्रकाशः संवित्कर्मतामन्तरेणाप
रोक्षत्वात् संवेदनवत् नच विशेषणासिद्धो
हेतुः आत्मनः संवित्कर्मकर्तृभावविरोध
प्रसंगात् - स्वस्वरूपेण कर्तृत्वं विशिष्टरूपेण
कर्मत्वमित्यविरोध इति चेन् गमनक्रियायाम
प्येकस्य तथैवोभयरूपत्वप्रसङ्गात् नच सा
धनविकलो दृष्टान्तः संवेदनस्य संवेदना
न्तरापेक्षायामनवस्थानात्-
सुप्तिमूर्छासमाधिषु स्थूलसूक्ष्मजगतोबा
धः तत्साक्षी आत्मा गृहगघटादिष्वपनीते
षु यथा नभ एव शिष्यते एवमात्मा सर्वनि
राकरणसाक्षी - सर्वस्य बाधेन किञ्चिदवशि
ष्यत इति वदतां सर्वाभावविषयकं ज्ञानमव
रूपमभ्युपेतव्यम् तदेवात्मा-
उत्तरोत्तरकस्य एकदेवजीवेश्वरभावे दृष्टान्तः
पिता पितामहश्चैकः पुत्रपौत्रयथा प्रति-
लिंगदेहकल्पनाधारभूतं यच्चैतन्यं यच्च तत्र
कल्पितो लिंगदेहः तत्र वर्तमानो यश्चिदाभा
सः एतेषां त्रयाणां समष्टिर्जीवशब्दवाच्यः
मायायां स्वर्जनशक्तिवन्मोहनशक्तिरपि
सा जीवं मोहयति-

मृषासिक्तं कुतन्नाम्रादि यथा मृषाकारं भवति
तथा बुद्धिरपि रूपादीन्विषयी कुर्वती तदाका
राभवति - मूषा - सूचा यथा वाआलो
कआतपादिः प्रकाश्यस्य घटादेराकारतांया
ति तथा बुद्धिरपि-
मानसं जगज्जीवस्य बन्धकं नेश्वरम्-
योगेन तात्कालिकद्वैतोपशमः नात्यन्तिकः
ज्ञानेनात्यंतिक इति ब्रह्मज्ञानापेक्षास्ति-
वाक्षद्वैतनिवारणाभावेपि तन्मिथ्यात्वज्ञाना
देव बंधहानिः पारमार्थिकमद्वैतं च वेकुंश
क्यम् - द्वैतमिथ्याज्ञानं नाद्वैतज्ञानप्रयो
जकम् अपितु तन्निवृत्तिरितिमत्वानप्रमा
ह त्तलये; द्वैतज्ञानसंभवप्रसंगः -
रेश्वरं द्वैतं अद्वितीयज्ञानाबाधकं गुरुशा
स्त्रादिरूपं तत्तत्साधकम् - जीवसृष्टं द्वैतं
शास्त्रीयमशास्त्रीयं चेति द्विधा आद्यं बोधप
र्यन्तंग्राह्यम् - द्वितीयमपि द्विधा तीव्रं मंदं
च आद्यं कामक्रोधादि मंदं मनोराज्यादि-
धौतपद्दितलांछितरं जितेत्यवस्याब्रवप
दे, तथावक्ष्यापि चिदन्तर्यामिसूत्रविराग
ख्याः - श्रुद्रुक्तिन् १ मायायोगादन्तर्यामीर
अपंचीकृतभूतकार्यसमष्टिसूक्ष्मशरीरयो

२३ गात्स्त्रात्मा ३ पंचीकृतभूतकार्य्यसमष्टि
स्थूलशरीरयोगाद्विराट् ४
यथा चित्रपटार्पितनराणां वस्त्राभासा लि
ख्यन्ते शीताद्यनिवारकत्वादाभासाः स्वा
धारपटतोनभिन्नाः एवं जीवाः तेऽसंसरंति-
वस्त्राभासस्य वर्णितं आधारवस्त्रगात्यथा
सावदन्ति तथा चिदाभाससंसारं चिद्गतं व
दन्ति- पर्वतादिषु न चिदाभासाः चित्र
पर्वतादौ वस्त्रलेखस्यानिष्प्रयोजनत्वेनाभा
वात्- कूटस्थब्रह्मजीवेशेति भेदतश्चि
चतुर्द्धा- घटमहज्जलाभ्राकाशवत्-
व्यावहारिकमेतत्-
घटाकाशस्य नीरे प्रतिबिम्बितः साभ्रन
त्तत्राकाशो जलाकाशः १ मेघमण्डल
स्य नीरे यः प्रतिबिम्बितः सोऽभ्राकाशः २
स्थूलसूक्ष्मदेहद्वयावच्छिन्न आत्मा तद
धिष्ठानरूपः कूटस्थः- कूटस्थे कल्पि
तबुद्धौ चित्प्रतिबिम्बो जीवः स संसरति-
जलाकाशेन घटाकाशो यथा तिरोहितो भ
वति तथा कूटस्थोपि जीवेन- स्वयमेवा
न्योन्याध्यासः- प्रतीचि कूटस्थे विद्यार
ते स्थूलसूक्ष्मदेहसहितश्चिदाभासो विदे २३

पाध्यासः शुक्तौ रूप्यवत्- शुक्तौनीलपृष्ठत्रि
कोणत्वंयथातिरोहितं- तथासंगानंदतापिकू
टस्थे- स्वप्रकाशचिदात्मनिभासमानेतद
तिरिक्तोऽहमित्यभिमानउपलभ्यते शुक्तौर
जतवत्- स्वयंकूटस्थः शुद्धचिदाभासः-
चेतनाचेतनविभागेचिदाभासस्त्वासत्त्वेकार
णम्- कूटस्थस्यचेतनाचेतनविभागहेतु
त्वाभावेऽचेतनस्यत्वेऽचेतनकल्पनाधिष्ठान
त्वेनकूटस्थोऽभ्युपगन्तव्यएव-
चेतनश्चिदाभासोयथाकूटस्थेभ्रान्त्याका
ल्पितस्तथाघटादिरपितत्र-
बुद्धिसाक्षिणः कूटस्थस्यबुद्ध्याप्रत्यक्षीकर्त्तु
मशक्यत्वादहमितिप्रतिभासमानयोर्जीव
कूटस्थयोर्भ्रान्त्यैकत्वम्-
कर्मसहिताविद्याजन्यस्यदेहादेर्विक्षेपरू
पस्यकर्मावसानान्तमवस्थानम्- ननुप्रा
रब्धकर्मणोनिमित्तकारणत्वादुपादानेऽवि
द्यायांनष्टायांकथंकार्यानुवृत्तिरितिचेन्न
उपादानेनष्टेऽपिदारणंकार्य्यंतिष्ठतीतिनाकि
ः कुलालचक्रभ्रमवत्-
ाध्यःमेकमते आत्मावयवानांसूक्ष्मा
सुनाडीषुप्रवेशः उपचर्य्यते हस्तयोः कं

२४ कप्रवेशेन देहस्य कंचुकप्रवेशवत्- न्यूना
धिकशरीरप्रवेशो वयवागमापायाभ्याम्
देहवत्- माध्यमिके कृतनाशाकृताभ्या
गमदोषः सिद्धान्तिमते- सिद्धांते तु विभुरात्मा-
आभाकरता किंकमते आत्मा अचित्-
आत्मा पृथिव्यादिभिन्नः ज्ञानगुणकत्वात्-
आत्मनो विभुत्वे लोकान्तरगमनादिकं कथ
मिति चेत् न अत्र देहे कर्मवशादिच्छाद्युत्प
त्तौ अत्रावस्थानादिव्यवहार इव कर्मवशा
ल्लोकान्तरे देहान्तरोत्पत्तौ तदवच्छिन्नात्म
प्रदेशेषु सुखाद्युत्पत्तिवशात्तत्रात्मनो गम
नादिव्यवहार औपचारिक इति-
आनन्दमयकोशोयः सुषुप्तौ अस्पष्टचित्
सुखाभाकराणां तार्किकाणां चात्मा तस्से
वज्ञानादयोतराः -
नहि द्रष्टुरिति श्रुतेरयमर्थः द्रष्टुरात्मनः
स्वरूपभूताया दृष्टेर्लोपो नेति-
क्लेशकर्मविपाकैस्तदाशयैरपरामृष्टः पु
रुषविशेष ईश्वर इति पातञ्जलसूत्रम्-
मायोपाधिकः परमात्मा लिङ्गशरीर
समष्ट्यभिमानेन हिरण्यगर्भ इत्युच्यते-
स्थूलशरीरसमष्ट्यभिमानी विराडीश्वरः २४

सहस्रशीर्षेति विश्वतश्चक्षुरिति श्रुतयः-
सर्वतः पाणिपादन्त्वेकुष्यादेरपि वेशता-ततश्च
उर्मिर्वो देवस्य वेशोने नरः प्रमान्-
मायांतु प्रकृतिमिति श्रुतेस्तज्जराईम् तस्यावय
वभूतैस्तु व्याप्तं सर्वमिदं जगत्-
प्रसारणसंकोचाभ्यां चित्रपट इव माया जगतः
सत्त्वासत्त्वे दर्शयति- सगुणानंदमये सर्व
प्राणिबुद्धिवासनानां निवासान्ताभिर्वासना
भिः सर्वं जगद्विषयीकृतं तेन सर्वबुद्धिवास
नावत्स्थानोपाधिकत्वेनेश्वरः सर्वज्ञ उच्यते
- ईश्वरः सर्वभूतानामिति गीतायामप्यम
र्थः सर्वभूतानि विज्ञानमयात्मेव हृदयपुं
रीके स्थिताः कथं हृद्यन्तर्यामिणो विज्ञानम
याकारेण परिणामात्-देहादिपंजरं यंत्रं तदा
रोहोऽभिमानिना- विहितप्रतिषिद्धेषु प्रवृत्ति
र्भ्रमणं भवेत्- विज्ञानमयरूपेण तत्प्रवृत्ति
स्वरूपतः- स्वशक्त्येशो विक्रियते मायया भ्रमणं
हितत्- ईदृग्बोधेनात्मसंगत्वयीजनिः
७ विसिरोभावावुत्पत्तिप्रलयौ-
ईशसूत्रं विराडुधा विष्णुरुद्रेन्द्रवह्नयः विघ्न
भैरवमैरालमारिकायक्षराक्षसाः ६ विप्र

51

52

संता धनात्कलौ ग्रथिपामंडलानांच संग्रामे ष्वपराजिताः
इद्रेंणा नवमहूर्वंच लग्नु आज्ञापिभाविनः मेरुतंत्र०२३ 53
प्रकाशे –
अथातः संप्रवक्ष्यामि औषधीनां विधिं वरे येन विज्ञानमात्रेण सर्व
सिद्धिर्भविष्यति १ महाकालस्य बीजानि श्वस्य मेकं समाहरेत्
धात्रीरसेन देवेशि सप्तवारान्विभावयेत् २ कर्णव्याघ्रिका तानि
मुखे निक्षिप्य पार्वति अचिरेणैव कालेन स्वयं पारावतो भवेत्
३ अथातः संप्रवक्ष्यामि मत्सुतं च मम वल्लभे छागस्य शीर्षं संग्र
ह्य तत्र कृष्णमृत्तिकां पूरयित्वा पुनः तत्र बीजानि वापयेत्
यत्कालेन निपुष्पितानि भवंति तदास्य पर्णानि क्षिपेत् स
छागो भवति – मयूरशीर्षमादाय कृष्ण चतुर्दश्यां मृत्तिकां पू
रयेत् शालबीजानि वापयेत् यदा फलितः पुष्पितो भव
ति तदा शालबीजानि ग्रीवायां बन्धयेत् मयूरो भवति –
कृष्ण चतुर्दश्यां मर्कट शीर्षमादाय कृष्णमृत्तिकां पूरये
त् कार्पासबीजानि वापयेत् यदा फलितः पुष्पितो भ
वति पुष्पफलेः संग्रह्य समं संपेषयित्वा अंगं विलिप्य पा
नीयमध्ये प्रविश्य पयजले तिष्ठति तदा मयूरो भवति
कृष्ण काकशीर्षमादाय काकमाची बीजानि वापयेत्
यदा फलितं पुष्पितं भवति तत्फलं संग्रह्य मुखे प्रक्षि
प्य काको भवति काकवद्गच्छति – मत्स्यमंडूकौ मोदः –

कृ: पारावतशीर्षमादाय कुसमृत्तिकां पूरयित्वा तिलबीजा
१३ नि वापयेत् क्षीरोदकेन सेचनीयं यदा फलितो भवति
तदा मुखे संस्थाप्य अंतर्हितो भवति - तेषां फलानां चूर्णं
कृत्वा तेन चूर्णेन यं स्पृशति स किंकरो भवति सर्वं स्व
दृशति तानि तिलानि संगृह्य नेत्रांजनेन सह विष्णा क
पिलादुग्धेन गुटिकां कारयेत् सप्तरात्रं पाचयेत् तां गुटि
कां मुखे निक्षिप्य अंतर्हितो भवति देवैरपि न दृश्यते मनुष्या
णां का कथा - उत्तीर्णपुरुषो भवति - जीवेद्वर्षशतं स्त्रियः
सर्वे जना अवश्या भवंति - गृध्रशिरः समादाय कुसचंद
ष्या कुसमृत्तिकायां निक्षिपेत् कुसलक्षणबीजानि वा
पयेत् यदा फलं पुष्पं भवति तदा पुष्पनक्षत्रे पुष्यं गृही
त्वा अंजनेन सह कपिलाघृतेन कज्जलं पातयेत् चक्षुरं
जनीयं यावत् तावत् योजनशतं पश्यति मेदिन्यां दिवा
नक्तत्राण्यपि पश्यति एवं उष्ट्र गर्दभ मर्कटि थादीनां गृह
स्तीवानां शिरसि यत्र यत् बीजं यस्य शिरसि वापयेत्
यदा पुष्पितः फलितो भवति तदा यस्य बीजानि मुखे नि
क्षिप्यते स जीवो भवति नात्र संदेहः मातुलुंगस्य मूल
गुंधतूर बीजकेन च - मलाडु चूर्णमादाय सूक्ष्म चूर्णं का
रयेत् - यो स्य गंधं समाघ्रा x पुष्प x तिस च तेन पश्यति
ऊं कुंभिपटहं श्रीवंशं स्वाश्रीवतुलेपयेत् एष मंत्रो मसदा
नां कुमारीणां गृहेषु च भूपतिसेवमानानां तत्यानुत्को
णकौशिकीणां मूलजीविनाम् - न चाग्निर्दह्यते वेश्मयत्रैव सो ऽ

गदो भवेत् पानार्थं नरस्य हृदयं चतुर्जिह्वाशोणितम् अंज
नं रोचना युग्मं वनिता वशीकृत्करम् - कपालं मानुषं रक्त
कनकस्य फलानि च कर्पूरं मधुसंयुक्तं निघृष्य तिलकेन
च नारी वा पुरुषो नेन वश्यो भवति निश्चयः - एष कापालि
को योगो वशीकरणः परमं मतम् - नरजिह्वा समं कृत्वा सूक्ष्म चूर्णं
तु कारयेत् जलेन च सुशीतेन दापयेद्विचक्षणः पाने फले
च पुष्पे च भक्ष्ये भोज्ये च दापयेत् प्रजापतिकुलोद्भूता यदि सा ता
दरुंधती सापि रक्ता प्रियं याति नान्यं पुरुषमिच्छति - हरिता
लं पद्मशाने कृष्णचतुर्दश्यां तिलाकुष्ठविमिश्रं ग्रासम् स्वबसुं
स वशी भवेत् नरः - नरतैलं प्रेतास्थि वर्त्तिकं कृत्वा पात्रे रात्रौ प्र
ज्वाल्य आर्कवृक्षस्कंधे कज्जलं कृत्वा चक्षुषी अभ्यज्येत् यं पश्य
ति स वश्यो भवति - कर्पूरं तगरं तं माला लाक्षा दे तालिम लनाय मू
नासिकोद्भवरक्तं च चूर्णमेतद्बलायुतम् - एतत्सर्वं समं कृत्वा
गुटिकां कारयेद्बुधः पानभोजनके देयं वशीकरणमुत्तमम् -
काकजिह्वा वचा कुष्ठमात्मनो रुधिरं स्त्रियः नजातदन्तेकं
त्रिशातगरं गोरसर्षपाः शिवनिर्माल्यसंयुक्तं समभागानि
कारयेत् - भोज्ये पाने च वा देयं स्त्रीणां वशकारकम् - निम्ब
पुरुषमिच्छती मृतमपत्यं गच्छति - कृष्णसर्पस्याङ्गुलत्र
माणं शिरश्छित्वा स्यादि संधिकं सर्वपादिभिः पूरयि
त्वा धत्तायां कं प्रोक्षयेत् पवितः सर्षपान्ग्राहयित्वा ता
नियसे दीयं ते स वश्यो भवति - पूगीफलं गिलित्वा
पानमार्गेण निर्गतं संगच्छधत्ते ररमो नारितं कृत्वा सप्त
दिना निरुजयेत् पुनः कुंकुमचन्दनैराधवा साय सेदी

वृ· यतेसवश्योभवति- दर्दुरस्यमंगहीनकूर्मेनलहयेत् तद्
१३ स्तमहपानेनवश्यकृत्स्वरमोमतः -श्वेतगंधस्यपंगाग्नौ
वचांकुष्ठेनभावयेत् प्रभातानभस्मसंयुक्तंचूर्णंचवेत्रिशुद्धं
भम्- अनेनैवतुचूर्णेनयोजयेत्त्रीप्रमादवान् उच्चिष्टंतक
लितंदृष्टाचूर्णंवृत्ताद्विलम्बयेत् तत्संगान्मलतेहृतो
नरनारीसुकाकथा- त्रिफलामूलसम्पुरांस्तैलंचवेनापिमि
श्रितम् ददातियस्यपानेषुसोपिवश्योभवेध्रुवम् - गोपि
तंसैंधवंचैवहस्तीफलमेवच लेप्यमेननत्रयोक्तंवांतरनी
रीवश्यकारकम्-उच्चाटनलिख स्वामिनोरुधिरान्वित
म् स्त्रीपुंसयोः प्रदातव्यंवशीकरणमुत्तमम्- श्वेतार्क
रोचनायुक्तमानमस्तेनलेपयेत् ललाटेतिलकंकृत्वा
त्रैलोक्यंत्रोभयेत्स्वरमान- ददमानेनानेनैवसर्वोभवति
किंकरः- श्वेतार्कचंदनेनैवरक्तंचयेत्तस्तलेपयेत् दीय
तेकस्यचिद्वापिपश्चाद्दासोभविष्यति- मधूकंसहितैलेन
साधयेत्तानुपेषयेत् रात्रौपाणिमध्यन्त्यमत्रीस्मासहिता
५ स्वपेत् संरक्तेमैथुनीभावेपतिर्दासोभविष्यति - यानि
कानिचवीजान्यंकोलतैलेनमेलयेत् सफलोजायते
वृक्षः सिद्धयोगउदाहृतः - शवक्षरवेविदमात्रंतत्तैलंनि
ःक्षिपेद्यदि रक्तयाममवेत्तीवोनान्यथाशंकरोदितः
म्- शिग्रुवीजस्थितंतेलंपारावतपुरीषकम् वराहस्य
वसायुक्तंगृहीत्वाचसमंसमम् गर्दभस्यवसायुक्तंहरिता
लंमनःशिलाम् रोभक्तातिलकंकृत्वायथालकोस्वरोन्

वृ: पः - उलूकविष्ठां गृहीत्वा त्वेरण्डतैले न पेषयेत् यस्यांगे निः
१३ क्षिपेद्विन्दुं स क्षिप्तो जायते ध्रुवम् - सर्पदन्तं गृहीत्वा तु वृ
श्चिककंटकम् कृकलासलांगुलं सूक्ष्मं च चूर्णं
तु कारयेत् यस्यांगे निक्षिपेच्चूर्णं स द्यो याति यमालय
म् - सिन्दूरं गंधकं तालं समं पिष्ट्वा मनःशिलाम् तत्क्षि
प्रवंसं क्षीरसिक्तं निवन्धे दहपते ध्रुवम् - अर्कक्षीरं वट
क्षीरं क्षीरं डुम्बरसंभवम् गृहीत्वा पात्रके लिप्ते जलपूर्णं
करोति च दुग्धं तत्र भवेत्सद्यो महाकौतुककम् -
अंकोलतैललिप्तांगो दृश्यते राक्षसाकृतिः - पलाय
न्ते नराः सर्वे पशुपक्षिगजादयः - अंकोलस्य तु तैले
न दीपं प्रज्वालयेन्नरः रात्रौ पश्यति भूतानि खेचराणि
महीतले - बुधे वा शनिवारे वा कृकलो ग्राह्यस्ततः
शत्रुर्भक्ष्यते यत्र कृकलं तत्र निक्षिपेत् निखनेद्भूमि
मध्ये उद्धृते च पुनः सुखी नपुंसकं भवेत्तस्य नान्ये
घातं करोति तम् - गंधकं हरितालं च गोमूत्रेण च विष
तथा सूक्ष्मचूर्णमयं कृत्वा किञ्चिद्वह्नौ विनिःक्षिपेत्
विघ्ना: सर्वे पलायन्ते यथा पुरुषका नरा: - दत्तात्रेय
तन्त्रे ॥५०

इन्द्रनील - पन्ना - तत्परीक्षा - हीरमध्ये क्षिपेन्नीलं दी
र्घे नीलतां व्रजेत् इन्द्रनील इति ख्यातः सर्वरत्नोत्तमो
त्तमः -

59

60